श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

अम्बरीष कृतम्

# ॥ श्रीमहासुदर्शनस्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीमहासुदर्शनस्तोत्रम् ॥

अम्बरीष उवाच

त्वमग्निर्भगवान् सूर्यस्त्वं सोमो ज्योतिषां पतिः।
त्वमापस्त्वं क्षितिर्व्योम वायुर्मात्रेन्द्रियाणि च॥ १ ॥

सुदर्शन नमस्तुभ्यं सहस्राराच्युतप्रिय।
सर्वास्त्रघातिन् विप्राय स्वस्ति भूया इडस्पते॥ २ ॥

त्वं धर्मस्त्वमृतं सत्यं त्वं यज्ञोऽखिल यज्ञभुक्।
त्वं लोकपालः सर्वात्मा त्वं तेजः पौरुषं परम्॥ ३ ॥

नमः सुनाभाखिल धर्मसेतवे
    ह्यधर्मशीलासुरधूमकेतवे।
त्रैलोक्य गोपाय विशुद्धवर्चसे
    मनोजवायाद्भुतकर्मणे गृणे॥ ४ ॥

त्वत्तेजसा धर्ममयेन संहृतं
    तमः प्रकाशश्च दृशो महात्मनाम्।
दुरत्ययस्ते महिमा गिरां पते
    त्वद्रूपमेतत् सदसत् परावरम्॥ ५ ॥

यदा विसृष्टस्त्वमनञ्जनेन वै
    बलं प्रविष्टोऽजित दैत्यदानवम्।
बाहूदरोर्वङ्घ्रि शिरोधराणि
    वृक्णन्नजस्रं प्रधने विराजसे॥ ६ ॥

स त्वं जगत्त्राण खलप्रहाणये
    निरूपितः सर्वसहो गदाभृता।

विप्रस्य चास्मत्कुलदैवहेतवे
विधेहि भद्रं तदनुग्रहो हि नः॥ ७ ॥

यद्यस्ति दत्तमिष्टं वा स्वधर्मो वा स्वनुष्ठितः।
कुलं नो विप्रदैवं चेत् द्विजो भवतु विज्वरः॥ ८ ॥

यदि नो भगवान् प्रीत एकः सर्व गुणाश्रयः।
सर्वभूतात्म भावेन द्विजो भवतु विज्वरः॥ ९ ॥

श्रीशुक उवाच
इति संस्तुवतो राज्ञो विष्णुचक्रं सुदर्शनम्।
अशाम्यत् सर्वतो विप्रं प्रदहद् राजयाज्ञया॥ १० ॥

स मुक्तोऽस्त्राग्नितापेन दुर्वासाः स्वस्तिमांस्ततः।
प्रशशंस तमुर्वीशं युञ्जानः परमाशिषः॥ ११ ॥

॥ इति श्रीमहासुदर्शनस्तोत्रम् सम्पूर्णम् ॥